# न्यायमते शाब्दबोधप्रक्रिया

प्रो जवाहरलालः
सर्वदर्शन विभागः, श्री लाल बहादुर शास्त्री राष्ट्रिय संस्कृत विश्वविद्यालय,
नई दिल्ली, भारत

**सारांश:**

*मानाधीना मेयसिद्धिः मानसिद्धिश्च लक्षणात्, प्रमेयसिद्धिः प्रमाणाद्धिः*[1]*। प्रमाणं बिना प्रमेयपदार्थस्य सिद्धिः नैव भवितुमर्हति। अत एव प्रमेयपदार्थानां सिद्धये सर्वैरेव दार्शनिकैः प्रमाणानां व्यवस्थापनं स्वस्व सिद्धान्तानुरोधेन कृतमित्यत्र नास्ति संशयः। तत्र परमनास्तिकाभिमते चार्वाक् मते प्रत्यक्षमात्रमेकं प्रमाणमित्यङ्गीकृतम्। बौद्धाः वैशेषिकाश्च प्रमाणद्वयं प्रत्यक्षानुमानञ्चाभ्युपगच्छन्ति। तत्रैव साख्य-योगसिद्धान्तविदाः शब्दस्यागमाख्यस्य प्रमाणान्तरं स्वीकृत्य त्रिविधं प्रमाणं प्रतिपादयन्ति। अस्य शब्दप्रमाणस्यास्तित्वं नैयायिकाः, मीमांसकाः, वेदान्तिनश्च स्वीकुर्वन्ति। चार्वाक्-बौद्ध-वैशेषिकदर्शनेतरेषु दर्शनेषु शब्दप्रमाणस्य प्रमाणान्तरत्वसद्भावात् शब्दप्रमाणस्य प्रमाणत्वं, शाब्दबोधप्रकियाः विषये च किञ्चिद् विचार्यते।*

**भूमिका विवेचनञ्च:**

**आप्तोपदेशः शब्दः** इति अस्ति तार्किकाभिमतानां शब्दप्रमाणस्य लक्षणम्। आप्तत्वञ्च तत् तत् धर्मसाक्षात्कारवतः आप्तः इति[2]। शब्दस्येदं लक्षणं सर्वेषां कृते समानं वर्तते। ऋषयः वा भवतु म्लेच्छः वा भवतु। तदेव आचार्यः वात्स्यायनः स्पष्टयति लक्षणमिदं ऋषीणां आर्याणां म्लेच्छाणां च समानमिति वात्स्यायनः अभाषत[3]। तत्र आचार्यः उदयनः न्यायपरिशुद्धौ शब्दस्येवं लक्षणं विहितं समयसामर्थ्यवशात् सम्यक्परोक्षानुभवसन्धानं शब्दः[4]। वस्तुतस्तु वैशेषिक मते शब्दः न पृथक्प्रमाणम्। तेषां मते अनुमाने एव शब्दस्यान्तर्भावः भवतीति। तथा हि वैशेषिकैरुक्तं शब्दः अनुमानम् व्याप्तिबलेनार्थप्रतिपादकत्वात् धूमवदिति। यथा धूमेन लिङ्गेन अप्रत्यक्षस्य बह्नेः ज्ञानं भवति तथैव शब्दस्य ज्ञानमनुमानेनैव स्यादिति तात्पर्यम्। यथा प्रसिद्धसमयस्य असंदिग्धलिंगदर्शनप्रसिद्ध्यनुस्मरणाभ्यां अतीन्द्रियेर्थे भवत्यनुमानमेवं

शब्दादिभ्योपि। अतः शब्दस्य प्रमाणत्वं नाभ्युपेतमनुमाने अन्तर्भावादिति वैशेषिकानामाशयः। आचार्यशिवादित्यः वैशेषिकदर्शनस्य प्रकरणग्रन्थे सप्तपदार्थ्यामुक्तं शब्दः अनुमानमेव इति व्याख्या

1 सांख्यकारिका

2 न्यायदर्शनम् 1-1-7

3 वात्स्यायनभाष्यम् 1-1-7

4 न्यायपरिशुद्धिः 372


©Indira Gandhi National Open University

अनुमानविषयत्वाच्चेति। तथा हि उक्तं शब्दस्यापि अनुमानविषयत्वेन अविनाभावोपजीवकत्वेन वा अनुमानत्वम्[5]। परन्तु नव्यन्यायमते आचार्यः गंगेशः अनुमानस्य पृथक्प्रमाणत्वं प्रतिपादयन् सूचयति

शब्दलक्षणम् प्रयोगहेतुभूततार्थतत्त्वज्ञानजन्यः शब्दः प्रमाणम्। अर्थात् शब्दः अस्ति पृथक् प्रमाणमतः शब्दस्य प्रामाण्यमपि अस्तीति। तदेव स्पष्टयति न्यायसिद्धान्तमुक्तावलीकारः मुक्तावल्यां शब्दप्रमाण विषये –

पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी।।

अर्थात् शब्दस्य पृथक्प्रमाणत्वं अस्ति, शाब्दबोधोपि भवति। शाब्दबोधे च पदज्ञानं करणं भवति। प्रमाकरणं प्रमाणं इति कृत्वा यत् करणं तत् प्रमाणम्। शाब्दबोधे पदज्ञानस्य करणत्वात् पदज्ञानमेव करणं भवति शाब्दबोधे। तत्र च पदार्थस्मरणं व्यापारः भवति। व्यापारस्तावत् तज्जन्यत्वे सति तज्जन्यजनकत्वं भवति। अतः पदज्ञान जन्यत्वे सति पदज्ञानजन्यस्य शाब्दबोधस्य जनकः व्यापारः स च व्यापारः वृत्त्यापदजन्यपदार्थस्मरणमेवेति। पदार्थस्मरणं पदज्ञानजन्यं भवति। पुनश्च पदज्ञानजन्यस्य शाब्दबोधस्य जनकः अपि भवति। तत्र क्रमः वर्तते पदज्ञानेन पदार्थस्मरणं भवति पदार्थस्मरणेन च शाब्दबोधः भवति इति तात्पर्यम्। अत्र च शाब्दबोधे शक्तिज्ञानं सहकारिकारणं भवति। शाब्दबोधश्च फलं भवति। आचार्यः अन्नंभट्टः शब्दस्य लक्षणं इत्थं करोति आप्तवाक्यं शब्दः[6] इति। अत्र आप्तो नाम यथाभूतस्यार्थस्योपदेष्टा यथार्थवक्तेत्यर्थः। यः आप्तोपदेष्टा स आप्तः तस्य च वचनम् शब्दप्रमाणमित्यर्थः। आचार्यः जानकीनाथः न्यासिद्धान्तमञ्जर्यां किञ्चिद्विशिष्टं प्रतिपादयति शब्दप्रमाण विषये तथाहि जन्यशब्दधीजन्यत्वव्यभिचारि अनुभवत्वव्यापकजातिशून्यत्वे सति पदविषयकत्वाव्यभिचारिजातिशून्यधीत्वं शब्दत्वमिति[7]। तत्र सांख्यशास्त्रे पि वृत्त्या पदजन्यपदार्थोपस्थितिश्च तत्र व्यापारः, शक्तिज्ञानं सहकारिणी भवतीति। सूत्रकारः वस्तुतः आप्तपदेशः शब्दः इति शब्दप्रमाणस्य लक्षणं करोति आप्तस्योपदेशः आप्तोपदेशः आप्तस्तावत् यथाभूतस्यार्थस्योपदेष्टा भवति। अतः अत्र असपदग्रहणेन संशयविपर्ययादीनां निराकृतं भवति। भाष्यकारेण आप्तपदस्य किञ्चिद्भिन्नः अर्थः सूचयति तथा हि **आप्तिरत्र योग्यता। तथा च योग्यः शब्दस्तज्जन्यं ज्ञानं शब्दाख्यं प्रमाणमित्यर्थः। फलं च पौरुषेयः शाब्दबोध इति**[8]।अत्र आप्तपदस्यार्थः वर्तते योग्यता योग्यशब्दजन्यं ज्ञानं शब्दप्रमाणमित्यर्थः। वस्तुतः कश्यचिदपि वस्तुनः यथार्थज्ञानं आप्तिः। येन एकस्य वस्तुनः साक्षात्कारेण तस्य यथार्थज्ञानं प्राप्तं स तस्मिन् विषये आप्तः भवति। तस्योपदेशः आप्तोपदेशः। एतादृशोपदेशानां याथार्थ्ये भ्रमप्रमादविप्रलिप्सादीनां दोषाणां बाधकता न भवति। अनेन वस्तुनां यथार्थज्ञानमेव भवतीति। अत एव भाष्यसारकारः वदति **एवं च योग्यशब्दजन्यं वृत्त्याख्यं ज्ञानं शब्दरूपप्रमाणमित्यर्थः। फलं च पौरुषेयो बोधः। यद्वा आप्तिर्यथार्थज्ञानम्। तज्जनकोपदेश इत्यादि प्राग्वत्**[9]। अत्र वैदिकव्यवहारे आप्तानाप्तयोर्विवेकस्यावश्यकता न भवति वेदस्यापौरुषेयत्वात्।

---

5 सप्तपदार्थी ,72

6 तर्कसंग्रहः

7 न्यायसिद्धान्तमञ्जरी, 56

8 सांख्यप्रवचनभाष्यम्, 1-101

9 भाष्यसारः, 1-101


©Indira Gandhi National Open University

तदेव व्याख्यानं करोति वृत्तिकारेण - आप्तोपदेशः शब्दः, न त्वाप्तेन कृतः, अपौरुषेयत्वाद् वेदस्य। शब्द इति कारणकथनम्, फलं तु शब्दजन्यं ज्ञानं शब्दः, कार्ये कारणोपचारात्। शाक्यादिवाक्यानां वेदविरोधेनायुक्तत्वादाभासत्वम्[10]।

वस्तुतः वैदिकदर्शनेषु वैशेषिकदर्शनमेव शब्दप्रमाणं पृथक्त्वेन नाङ्गीकरोति। ते तु शब्दस्यानुमाने गतार्थत्वं प्रतिपादयन्ति। परन्ते तेषां मतं तु असमीचीनमेव भाति यतो हि अनुमितौ व्याप्तिज्ञानं करणं भवति। शाब्दबोधे पदज्ञानं करणं भवति व्याप्तिज्ञानं चाकरणं भवति उभयोः करणत्वे भेददर्शनात् अनुमानशब्दप्रमाणयोः भेदस्तु सर्वैरेव दार्शनिकैः प्रतिपादितः। शब्दप्रमाणं शाब्दबोधे साक्षादुपयोगिः वर्तते। अत एव महर्षिणा गौतमेन शब्देनैव शब्दप्रमाणं निगदितम् प्रत्यक्षानुमानोपमानशब्दाः प्रमाणमिति[11]। वेदस्य च शब्दरूपत्वादपि तस्यापलापं नैव कर्तुं शक्यते। अतः शब्दप्रमाणं त्वावश्यमभ्युपेयमिति। शब्दप्राणस्य प्रमाणत्वमङ्गीकृत्य तज्जन्यं ज्ञानं शाब्दबोधाख्यं कथं भवति का च तस्य शाब्दबोधस्य प्रक्रिया इति विषये विचार्यते तथा हि –

**शाब्दबोधस्य प्रक्रिया**

न्यायदर्शने चत्वारि प्रमाणानि निगदितानि तत्र शब्दप्रमाणस्य यत्फलं तद्विषये नैयायिकानां मतं वर्तते शाब्दबोधे पदज्ञानं करणं भवति। तत्र पदस्य ज्ञानं करणं न तु ज्ञायमानं पदं करणं यतो हि मौनिश्लोकेनापि शाब्दबोधः भवति। एवमेव पदज्ञानजन्यपदार्थस्मरणं व्यापारः भवति। पदज्ञानं शाब्दबोधस्य करणं पदार्थस्मरणस्यापि करणम्। पदज्ञानेन पदार्थस्मरणमपि भवति शाब्दबोधोपि भवति परन्तु पदज्ञाने जातेपि पदार्थस्मरणं बिना शाब्दबोधः न संभवति। अतः पदज्ञानजन्यं पदार्थस्मरणं पदज्ञानजन्यस्य शाब्दबोधस्य कारणं भवति। परन्तु न्यायनये पदज्ञानेन वृत्त्या शाब्दबोधः संभवति। अथ एव शक्तिज्ञानं सहकारिकारणमुक्तं वर्तते।

न्यायमते पदनिष्ठा वृत्तिश्च द्विधा भवति शक्तिर्लक्षणा चेति। इयं पदगता पदार्थबोधकताशक्तिरेव शास्त्रान्तरेषु अभिधा इत्यभिधीयते। सा च शक्तिःसङ्केतानुकूलः पदपदार्थसम्बन्धः। पदं यत्रर्थे शक्तं स किं जातिः किं वा व्यक्तिः जातिविशिष्टव्यक्तिर्वा इत्यत्र दार्शनिकानां भिन्न-भिन्नानि मतान्युपलभ्यन्ते। व्यक्तौ सङ्केतश्चेद् व्यक्तीनामानन्त्यात् तेषु सङ्केतग्रहणासम्भवः। जातिपक्षे एकस्मिन् पदे उच्चारिते जातिमात्रबोधः प्रसज्येत प्रवृत्तिनिवृत्यादिक्रियाश्च जातावेव प्रसज्येरन् तच्च न सम्भवति। तस्माज्जातिपक्षो व्यक्तिपक्षश्चोभयपक्षमपि न सङ्गच्छते। यदि तु जातौ शक्तिः व्यक्तिस्तु आक्षेपगम्या इत्युच्यते तदपि न तद्विषयकशाब्दबोधं प्रति वृत्तिज्ञानाधीनतत्पदजन्यतद्विषयकार्थोपस्थितेः कारणत्वात् जातौ शक्ति स्वीकारे वृत्तिज्ञानाधीनजातिरूपार्थस्यैवोपस्थितौ व्यक्तेरनुपस्थितौ तस्याः शाब्दबोधे कथमपि भानं न स्यात्।

---

10 अनिरुद्धवृत्तिः, 1-101

11 न्यायसूत्रम्, 1.1.4


©Indira Gandhi National Open University

अतश्च जातिविशिष्टायां व्यक्तावेव शक्तिः स्वीकार्या न जातौ नापि व्यक्तौ वा केवलम्। अयमेव न्यायराद्धान्तः। पदगतैषा शक्तिश्च यद्यपि व्याकरणोपमानकोशाप्तवाक्यव्यवहारवाक्य शेषविवृतिप्रसिद्धपदसान्निध्यैश्चापि गृह्यते तथापि शक्तिग्रहं प्रति व्यवहार एवोत्तमं साधनमिति जरन्नैयायिकाः।

वस्तुतः अस्मिन् न्यायमते वाक्यार्थः न शक्यः न वा लक्ष्यः अपितु वाक्ये प्रयुक्तानि आकांक्षा-योग्यता-सन्निधिमतानि पदानि पदार्थस्मारकानि तेन च शाब्दबोध- भवतीति। यथा गामानय इत्यत्र गाम् आनय पदद्वयं वर्तते। शक्तिः पदे वर्तते अतः गाम् श्रवणानन्तरं आनय इति पदं श्रूयते तदनु गाम् आनय इति पदं आकांक्षादि युक्तं भवति चेत् तदा गामपदस्य शक्तिः आनय इति पदस्य च शक्ति आकांक्षादिमत्त्वात् अर्थं स्मारयति। तेन च शाब्दबोधः भवतीति। यतो हि व्युत्पत्तिज्ञानं बिना न कोपि वाक्यार्थबोधे समर्थः भवति लोके। व्युत्पत्तिश्च व्याकरणादिशास्त्रेणैव संभवति। पुनश्च लोकव्यवहारस्यास्ति महद्वैशिष्ट्यम्। शाब्दबोधे एकः प्रवक्ता भवति अपरश्च ग्रहीता यं शाब्दबोधः भवति। तत्र यं पुरुषं पदस्य शक्तिग्रहः नास्ति तं पुरुषं व्याकरणेन केशेन प्रसिद्धसान्निध्यपदेन उपमानेन व्युत्पत्तिः ग्रहः भविष्यत्येव इत्यत्र नास्ति प्रमाणमिति। अतः व्यवहारस्य प्रामुख्यं वर्तते शाब्दबोधे। व्यवहारेण अतितरामेव शक्तिग्रहः जायते। न्यायसिद्धान्तमुक्तावल्यां शक्तिग्रहोपायाः उक्ताः सन्ति। तथा हि –

शक्तिग्रहं व्याकरणोपमावनकोशाप्तवाक्याद्व्यवहारतश्च ।
वाक्यस्य शेषाद्विवृत्तेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः[12]॥

व्यवहारः कथं स्यादिति जिज्ञासायां कश्चिद् वृद्धः युवानमभिलक्ष्य एकं वाक्यं उच्चारयति। तं वाक्यं श्रुत्वा युवा तमाचरति। एतत् सर्वं पार्श्वस्थः बालः श्रुणोति अनुभवति च। यथा वृद्धेनोक्तं जलमानय इति युवा कश्चित्जलपात्रविशेषं नीत्वा गच्छति तस्मिन् च जलमापूर्य आगच्छति जलमानयति इत्यर्थः। तं पार्श्वे उपविष्टः बालकः पश्यति शब्दमपि श्रुणोति युवानः व्यवहारमपि पश्यति। इत्थमावापोद्वापद्वारा जलादिपदानां जलादिरूपे अर्थे शक्तिं ग्रह्णाति। यद्यपि भाट्टमीमांसकानां मते पदे शक्तिः न भवति तेषां मते शक्तिस्तु आकृतावेव भवतीति। यथा जलमानय इत्यत्र जलकर्मकं आनयनमित्येव शाब्दबोधः भवति। ज

अत्र न्यायसिद्धान्तमञ्जर्यां आचार्यजानकीनाथभट्टाचार्येण प्रतिपादितं यत् सकलजनानुभवसिद्धः शब्दः एव कारणम्। तत्र शाब्दप्रमितौ करणं शब्दः[13]। शब्दः अत्र वाक्यार्थे प्रयुक्तः। अस्माद्वाक्याद् पदाद्वा अमुमर्थं बोधव्यम् इति। यद्यपि आचार्यजानकीनाथेन वैशेषिकाभिमतं शब्दस्यानुमानगतार्थत्वं निराकृतम्। तत्र व्याप्तेरभावादिति। यत्र यत्र शब्दः तत्र तत्र जलानयनाद्यर्थः भवति इति तु न भवति। शब्दस्य अकाशवृत्तित्वं जलादीनाञ्च अवृत्तित्वं अतः अर्थः अव्याप्यवृत्तिकः। अतः शब्दः अस्ति स्वतन्त्र प्रमाणमिति वक्तुं शक्यते।

---

12 न्यायसिद्धान्तमुक्तावली, शब्दखण्ड

13 न्यायसिद्धान्तमञ्जरी, 63


©Indira Gandhi National Open University

ये च पामराः सन्ति तेषां जलमानय इत्यादिभिर्वाक्यैः श्रवणानन्तरमपि अर्थज्ञानं न जायते तत्र तु वस्तुतः कारणं शक्तेरभावः एव भवति।

शाब्दबोधे शक्तिज्ञानं सहकारिकारणं भवति। आचार्यः जानकीनाथः शक्तेः स्वरूपं प्रकटयन् वदति संकेतः एव अभिधा न पदार्थान्तरं प्रमाणाभावात्। अनेनैव मीमासकानां मतमपि निराकृतं भवति। यतो हि मामांसकाः अभिधाख्यः स्वतन्त्रपदार्थः स्वीकुर्वन्ति। संकेतस्य च इच्छारूपत्वात् इच्छैव संकेतः। तथा हि स

च संकेतो अस्माच्छब्दात् अयमर्थो बोधव्यः इत्याकारिच्छा[14]। अत्र नैयायिकाः ईश्वरसंकेतमभिधा इति स्वीकुर्वन्ति इत्यत्रास्ति विशेषः। नास्तिकादिषु मतेषु ईश्वरस्यासद्भावात् कथं शाब्दबोधः इति जिज्ञासायां उच्यते संकेतरूपमेव शाब्दबोधं प्रति कारणं इति वक्तव्यम्। यत्रेश्वरेच्छारूपायाः शक्तेरभावः भवति यत्र च ईश्वरज्ञानस्याभावः भवति तत्र संकेत एव तत्र कारणमिति। सम्प्रति आधुनिके काले चैत्रादिशब्दानां कथं शक्तिग्रहः इति जिज्ञासायां उच्यते प्रथमतः शक्तिग्रहः व्यवहारादेवभवति। घटमानय इत्युच्यमाने सति केनचित् तं घटाद्यर्थं आनयनादिकं कश्चिज्जनः करोति, तं व्यवहारं दृष्ट्वा तृतीयस्तत्र प्रयत्नस्यानुमं करोति, अतः व्यवहारेण शक्तिग्रहं, शक्तिग्रहेण च वाक्यार्थज्ञानम्, वाक्यार्थज्ञानेन चोपमानं भवति। अतः उपमानमपि न शक्तिग्रहं प्रतिकारणम्।

**निष्कर्ष:**

तस्मात् पदानि पदार्थस्मृतिद्वारा आकांक्षादिसहकारेण अन्वयबोधं जनयन्तीति नैयायिकमतं सिध्यति। यद्यपि वेदानां प्रामाण्यमपि व्यवस्थापयितुं नैयायिका अनुमानमेवाश्रयन्ते। सूत्रकारो भगवान् गौतमो ब्रवीति -यथा विषादिनाशको मन्त्र-आयुर्वेदश्चाप्तवचनम्, फलदर्शनान्तरञ्च तस्य प्रामाण्यसिद्धिः, तथैवाप्तवचनत्वाद्वेदा अपि प्रमाणम्।

एवं च समालोकितमस्माभिर्यत् नैयायिकैः प्रत्यक्षानुमानोपमानशब्दाश्चत्वारि प्रमाणानि, तदुत्पन्नानि च प्रत्यक्षानुमित्युपमितिशाब्दाख्यानि चत्वारि यथार्थज्ञानानि स्वीकृतानि। एभिश्चतुर्भिरेव प्रमाणं सर्वेषां पदार्थानां यथार्थज्ञानं लब्धुं शक्यते। प्राप्ते च तत्त्वज्ञाने दुःखात्यन्तिकनिवृत्तिरूपनिःश्रेयसाधिगमः। स एव च मोक्षः सर्वेषामपि दर्शनानां परमं प्रतिपाद्यं प्रयोजनं च।

[14] न्यायसिद्धान्तमञ्जरी, 66


©Indira Gandhi National Open University